Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 4 | ISSN : 2581- 6306

# महाकवेर्माघस्य उपमावैभवम्

**डा. सुशान्तकुमारराजः**
सहाचार्यः, साहित्यविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.), श्रीसदाशिवपरिसरः, पुरी।

**शोधसारः** – संस्कृतसाहित्ये सुविख्यातमहाकविषु यद्यपि कविकुलगुरोः कालिदासस्य सर्वविधरचनासु रसादिव्यञ्जकरूपेण प्रमुखतया उपमालङ्कारस्य प्रयोगपाटवं समनुभूयते, तथापि तत्परवर्तिना माघकविना प्रणीते शिशुपालवधमहाकाव्ये विविधवर्णनाप्रसङ्गे तस्यैवालङ्कारस्य निवेशवैभवं नितरामवलोक्यते । समग्रमहाकाव्ये विद्यमानानाम् उपमालङ्काराणां समीक्षणेन प्रबन्धगौरवतादृष्ट्या अत्र केवलं प्रथमद्वितीयसर्गयोः विचारः कृतः । किञ्च केवलं प्रथमसर्गे उपमालङ्कारस्य चतुर्विंशति स्थलानि आकलितानि सन्ति। तथैव द्वितीयसर्गेऽपि विद्यमानान् उपमावैभवान् समीक्ष्य गवेषकानां कृते सूचनां प्रदाय प्रबन्धस्य परिसमाप्तिर्कृता।

**मुख्यपदानि**- पदलालित्यं, अर्थगौरवं, त्रिगुणसम्पन्नः, शब्दभाण्डागारः, हृदयारविन्दविकासः, कोमलकान्तपदावली, काव्यरङ्गं, उपमेयः, उपमानं, साधारणधर्मः, पतङ्गः(सूर्यः), इन्द्रभवनवच्चारुस्थानम्, अद्भुतोपमा इत्यादीनि।

---

**उपक्रमः-** विदितचरमेव यत् संसकृतसाहित्यजगति प्रतिष्ठितेषु कविपुङ्गवेषु उपमालङ्कारप्रयोगे यथा कविकुलगुरोः कालिदासस्य ख्यातिरस्ति, यथा चार्थगौरवतादृष्ट्या महाकवेः भारवेः काव्यानि प्रसिद्धानि सन्ति, तथैव गद्यकवेः दण्डिनः महाकवेः श्रीहर्षस्य च काव्येषु नितरां पदलालित्यं प्राप्यते । परन्तु एदादृशगुणगौरवविचारप्रसङ्गे ज्ञायते यत् शिशुपालवधमहाकाव्यस्य रचयितुः महाकवेः माघस्य काव्यरचनायां कालिदासवदुपमालङ्कारनिवेशपाटवम्, भारवेरिव अर्थगौरवत्वं तथा दण्डनः श्रीहर्षस्य च रचनाकौशलमिप पदलालित्यमपि विद्यत इति कृत्वा त्रिगुणसम्पन्नोऽयं महाकविः शोभते साहित्यसंसदि। अतः उच्यते –

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥**[1]

अष्टमशतके प्रादुर्भूतेन महाकविना माघेन शिशुपालवधमिति एकं विंशसर्गात्मकं महाकाव्यं रचितम् । एकेनापि महाकाव्येन यथाऽयं महाकविः प्रसिद्धिमवाप न तादृशी प्रतिष्ठा केनाऽपि महाकविना प्राप्ता। नूतनानां शब्दानां प्रयोगे कवेरस्य नैपुण्यमनुभूयते शिशुपालवधे महाकाव्ये । अतः शब्दभाण्डागाररूपेण परिचितेऽस्मिन् महाकाव्ये संस्कृतवाङ्मये विद्यमानानां सर्वेषामपि शब्दानां प्रयोगः समुपलभ्यते । का कथा समग्रमहाकाव्यस्याध्ययनेन, काव्यस्यास्य नवमसर्गान्तपर्यन्तं परिशीलयामश्चेत् संस्कृतसाहित्यसंसारे नूतनशब्दावशेषो नैव स्थास्यतीति कृत्वा केनापि समालोचकेन सप्रमाणमुक्तम्- **नवसर्गगते माघे नवशब्दो न विद्यते**[2] इति। सहृदयपाठकानां हृदयारविन्दविकासकरूपेणास्य महाकाव्यस्य प्राधान्यं वर्तते। अतः साग्रहमुच्यते समालोचनविचक्षणैः यत्- **काव्येषु माघः कविकालिदासः**[3] इति। संस्कृतसाहित्ये विद्यमानेषु काव्येषु कोऽपि पाठकः स्वजीवनावधौ केवलं शिशुपालवधमहाकाव्यं मेघदूतं चेति काव्यद्वयं पठिष्यति, तर्हि तस्य जीवनं सफलं भविष्यतीति कृत्वा कथ्यते- **मेघे माघे गतं वयः** इति।

**माघे सन्ति त्रयो गुणाः** इति कथनेन माघस्य कालिदासभारविदण्डिगतानां त्रिगुणानामपि एकायतनीभूतत्वम् अनुभूयते माघकाव्ये इति निश्चप्रचम्। आभाणकमनुसृत्यास्मिन्प्रबन्धे बृहत्त्रयी मध्ये अन्तर्गतेऽस्मिन् महाकाव्ये सर्वत्र पदलालित्यं दृश्यते। पदविन्यासो एव माघस्य शैल्याः कौशलरूपेण आभसते। वसन्ततौ माधुर्यमयैः वर्णै कविना सङ्गीतमयं वातावरणं प्रस्तुतम्। महाकविरयम् अलङ्कारप्रयोगे, व्यैयाकरणव्यवहारनैपुण्यप्रदर्शने, छन्दोमयरचनादक्षतोपयोगे, कोमलकान्तपदावल्याः सन्धाने, शास्त्रीयपाटवप्रदर्शने च सहृदय-पाठकानां सविधे स्वकीयां दक्षतां प्रतर्शितवान्। शिशुपालवधमहाकाव्येऽस्मिन् उपमा-अर्थगौरव-पदलालित्येषु त्रिगुणेषु विद्यमानायाः उपमालङ्कारप्रयोगचमत्कारितायाः अन्वेषणं क्रियते । प्रबन्धगौरवदृष्ट्या अत्र माघकाव्यान्तर्गतयोः केवलं प्रथमद्वितीयसर्गयोः सविस्तरं विचारो विधीयते अन्यसर्गाच्च स्थालीपुलाकन्यायन दिग्दर्शनमात्रं करिष्यते।

काव्यस्यात्मभूतस्य रसस्य उपमाद्यलङ्काराः कटककुण्डलादिवत् शोभाधायकाः भवन्ति । नाट्यशास्त्रे भरतेनाङ्गीकृतेषु चतुर्षु अलङ्कारेषु उपमा प्रमुखाऽस्ति । परवर्तिभिरालङ्कारिकैरपि अलङ्कारेषु उपमायाः प्राधान्यं प्रतिपादितम्। साधूक्तं चित्रमीमांसाकारेण आचार्याप्पय्यदीक्षितेन, यत्—

**उपमैका तु शैलूषी संप्राप्ता चित्रभूमिकाभेदान्।**
**रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ॥**[4]

इयमुपमा सर्वेषामर्थालङ्काराणां मूले कथञ्चित् राजते । शिशुपालवधे उपमाद्वारा काव्यसौन्दर्यं कथमस्तीति आलोचयामः।

## प्रथमसर्गे उपमावैभवम्-

शिशुपालवधस्य प्रथमे सर्गे आहत्य चतुर्विंशति स्थलेषु उपमालङ्कारो योजितऽस्ति। साधर्म्यमुपमाभेदे[5] इति मम्मटस्य उपमालक्षणानुसारेण उपमानोपमेययोः साधर्म्यमेव उपमा। प्रथमसर्गस्य चतुर्थश्लोके—

**नवानधोऽधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।**
**क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना ॥**[6]

स्वर्गादवतरतः नारदस्य शरीरं कर्पूरवत् धवलवर्णं दृश्यते। सः आकाशे कृष्णवर्णमेघानतिक्रम्य यदा आगच्छति तदा कृष्णवर्णयुक्तमेघसमीपे तस्य धवलवर्णशरीरं किम्भूतमासीदिति तुलयितुं माघः पद्यमिदं रचयति। क्षणेषु ताण्डवनृत्योत्सवेषु क्षणं स्वल्पसमयं यावत् भस्मविलिप्तः शिवः कृष्णवर्णं गजाजिनम् ऊर्ध्वम् उत्तोल्य यथा राजते तथा कृष्णवर्णमेघसमीपे विद्यमानः नारदः अपि राजते स्म । अत्र गजाजिनमुत्तोल्य विद्यमानः भस्मविलिप्तशरीरः शिवः उपमानः, तेन सह कृष्णवर्णमेघनिकटे विद्यमानः नारदः उपमेयः 'स्फुटोपमम्' इत्यत्र विद्यमानः उपमाशब्दः उपमाप्रतिपादकः शब्दः। अनन्तरं पञ्चमश्लोके नारदस्य जटावर्णनप्रसङ्गे कविः वर्णयति—

**दधानमम्भोरुहकेशरद्युतीर्जटाः शरच्चन्द्रमरीचिरोचिषम्।**
**विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं वततीततीरिव ॥**[7]

शुभ्रवर्णनारदस्य शिरसि शुभ्राः जटाः सन्ति। ताः जटाः हिमालये विद्यमानाः हिमखण्डसङ्गेन श्वेतवर्णतामाप्ताः व्रतत्य इव शोभन्ते। अत्र पद्ये हिमखण्डसङ्गेन शुक्लिमत्वमापन्नाः लताः हिमालयश्च उपमानः नारदः तद्गतजटाश्च उपमेयः। पद्येऽस्मिन् इव उपमाप्रतिपादकः शब्दः। तथैव —

**पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति।**
**सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं शितिवाससस्तनुम् ॥**[8]

अत्र पद्ये सुवर्णसूत्रेण बद्धं नीलमम्बरं धृतवता बलरामेण सह मौञ्जमेखलाकलितं मृगचर्म धृतवतः नारदस्य उपमा कृतास्ति । तादृशः बलरामः उपमानः, तादृशः नारदः उपमेयश्चास्ति । एवञ्च विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितन्तुभिः।

**विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितन्तुभिः।**
**कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनान्ते तडितां गणैरिव ॥**[9]

अस्मिन् पद्ये स्वर्णिमयज्ञोपवीतभूषितः धवलवर्णः नारदः वर्षर्तोरनन्तरं शरदि राजद्विद्युद्युक्तः शुभ्रमेघ इव शोभते इति उक्तम् । एतादृशः शरत्कालिकः मेघः उपमानः एतादृशः नारदश्च उपमेयः । अत्रापि विद्यमाना उपमा चमत्कारिणी । प्रथमसर्गस्याष्टमे श्लोके कविः लिखति—

**निसर्गचित्रोज्ज्वलसूपक्ष्मक्ष्मणा लसद्बिसच्छेदसिताङ्गसङ्गिना ।**
**चकाशतं चारुचमूरुचर्मणा कुथेन नागेन्द्रमिवेन्द्रवाहनम् ॥**[10]

अस्मिन् पद्ये स्वभावतः विचित्रोज्ज्वलसूक्ष्मपक्ष्मयुक्तेन शोभमानमृणालवत् शुभ्रशरीर-लिप्तेन मनोहरचमूरुमृगचर्मणा नारदः तद्वद् व्यराजत यद्वत् इन्द्रस्य वाहनम् ऐरावतः स्वपृष्ठास्तरणेन शोभते । अत्र मृगचर्मधारी नारदः उपमेयः, पृष्ठास्तरणयुक्तः इन्द्रस्य वाहनम् ऐरावतः उपमानः । अतः परं नारदः अनुगच्छतः देवान् निवर्त्य भगवतः श्रीकृष्णस्य इन्द्रभवनवच्चारुस्थानं (पदम्) निवासमिति यावत् आससाद । अत्र कविः रचयति —

**समासदत् सादितदैत्यसम्पदः पदं महेन्द्रालयचारुचक्रिणः ॥**[11]

अत्र श्रीकृष्णस्य पदं (निवासः) महेन्द्रालयचारु इति कथनेन इन्द्रभवनवत् रमणीयमिति ज्ञायते । इन्द्रस्य भवनमत्र उपमानम्, श्रीकृष्णस्य निवासः उपमेयः । ज्येष्ठभ्रातुः इन्द्रस्य भवनेन सह कनिष्ठभ्रातुः उपेन्द्रस्य निवासतोलनमत्र यथार्थमिति उपमायाः सार्थकता वर्तते । अतःपरं यदा नारदः भूपृष्ठे श्रीकृष्णस्य पुरतः आकाशात् अवतीर्णवान् तदा सः पतन् पतङ्गः (सूर्यः) इव तेजीयान् आसीत् । तं दृष्ट्वा भगवान् श्रीकृष्णः सत्त्वरं निजसिंहासनात् उत्थितवान्, यथा पर्वतशिखरात् मेघः उत्तिष्ठते । कवेर्भाषया —

**पतत्पतङ्गप्रतिमस्तपोनिधिः पुरोऽस्य यावन्न भुवि व्यलीयत ।**
**गिरेस्तडिद्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः ॥**[12]

उपर्युक्ते पद्ये नारदः तेजोमयत्वात् पतन् पतङ्ग इव उपमितः । अत्र पतन् पतङ्गः उपमानः नारदः उपमेयः । पतङ्गस्य पतनासम्भवात् पतत्पतङ्ग इत्यत्र अद्भुतोपमा इति दण्डिनः लक्षणं सङ्गच्छते । कृष्णवर्णः भगवान् श्रीकृष्णः, शुभ्रवर्णः नारदश्च यदा एकत्रास्तां तदा जनाः तौ कृष्णशुभ्रपर्वताविव अपश्यन् इति सूचयितुं कविः वर्णयति—

**न यावदेतावुदपश्यदुत्थितौ जनस्तुषाराञ्जनपर्वताविव ।**
**स्वहस्तदत्ते मुनिमानसे मुनिश्चरंतनस्तावदभिन्नवीविशत्॥**[13]

कृष्णवर्णपर्वतेन सह श्रीकृष्णः तुषारपर्वतेन सह नारदश्चात्र तुलितः तत्तद्वर्णपर्वतद्वयमत्र उपमानम् । श्रीकृष्णः नारदश्च उपमेयौ । अत्रापि उपमा चेतोहारिणी । श्रीकृष्णस्य सम्मुखे आसने उपविष्टं शुभ्रवर्णं नारदं वर्णयन् कविः वक्ति—

**महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे ।**
**श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम् ॥**[14] इति ।

श्रीकृष्ण इन्द्रनीलमणिकान्तितुल्यः । अतः सायंकालिकान्धकारसमानः सः भवति । शुभ्रवर्णः नारदः सायंकाले उद्यच्चन्द्र इवाशोभत । सायंकाले प्रथमोदयकाले चन्द्रः यथा सर्वमनोहारी तथा नारदः अपि सर्वमनोहारीति अतत्या उपमा प्रकाशयति । ऊनविंशश्लोके नवाम्बुदश्यामवपुरित्यत्र कृष्णः नवमेघेन सह उपमितः । नवाम्बुदवत् श्यामं वपुः यस्य इति विग्रहः । पीताम्बरधारी श्यामलाङ्गः श्रीकृष्णः कथमशोभत इति सूचयितुं कविः लिखति—

**स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः ।**
**विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां निधिः ॥**[15]

अत्र श्यामलाङ्गः श्रीकृष्णः नीलसमुद्रेण सह उपमितः । तस्य स्वर्णसमानकान्तियुतं पीताम्बरं बाडवाग्निशिखया सह उपमितम् । बाडवाग्निशिखावेष्टितस्य नीलसमुद्रस्य शोभा यथा, तथा पीताम्बरवेष्टितस्य श्यामलाङ्गस्य (ताराधिपस्य चन्द्रस्य लाञ्छनसमानकान्तियुक्तस्य) श्रीकृष्णस्य शोभा अतिचमत्कारिणी आसीत् ।

अधुना श्यामलाङ्गस्य श्रीकृष्णस्य शोभा शुभ्रवर्णस्य नारदस्य शोभा च मिथः मिलिता सती कथमासीदिति सूचयितुं कविः एकां चमत्कारिणीमुपमां योजयति । यथा—

**रथाङ्गपाणेः पटलेन रोचिषामृषित्विषः संवलिता विरेजिरे ।**
**चलत्पलाशान्तरगोचरास्तरोस्तुषारमूर्त्तेरिव नक्तमंशवः ॥**[16]

रात्रौ चन्द्रस्य किरणाः वृक्षस्यान्दोलितपत्रमध्ये पतिताः सन्तः यथा दृश्यन्ते तथा श्रीकृष्णस्य शरीरनिर्गतकृष्णकान्त्या सह नारदस्य शुभ्रशरीरनिर्गता शुभ्रकान्तिः मिलिता सती अदृश्यत। पुनः उभयशरीरकान्तिः मिथः मिलिता सती एकरूपत्वं गतेति दर्शयितुं श्रीकृष्णस्य कान्तिं तमालदलेन सह नारदस्य कान्तिं सप्तपर्णपाण्डुरेणुना सह तुलयति कविः —

**प्रफुल्लतापच्छिनिभैरभीषुभिः शुभैश्च सप्तच्छदपांशुपाण्डुभिः।**

**परस्परेण च्छुरितामलच्छवी तदेकवर्णाविव तौ बभूवतुः ॥**[17]

भगवतः श्रीकृष्णस्य नामान्तरं पुण्डरीकाक्षः। पुण्डरीकं नाम पद्मम्। तद्वदक्षिणी यस्य सः पुण्डरीकाक्षः। कविः माघः अत्र एकाम् अद्भुतां कल्पनां विधाय तेजोयुक्तं नारदं सूर्येण सह तुलयति। सूर्यवत् तेजोयुक्तं मुनिं प्रति उपेयुषी (उपगते) लोचने धारयन् श्रीकृष्णः उत्फुल्ललोचनः जातः। अतः सः पुण्डरीकाक्षः इति प्रथितः। वस्तुतः सूर्यतेजः आप्त्वा पुण्डरीकं प्रफुल्लितं भवति। कवेः भाषया एतत् यथा—

**निदाघधामानमिवाधिदीधितिं मुदा विकासं मुनिमभ्युपेयुषी।**

**विलोचने बिभ्रदधिश्रितश्रिणी स पुण्डरीकाक्ष इति स्फुटोऽभवत् ॥**[18]

यदा नारदस्य प्रशंसां कुर्वन् आदौ श्रीकृष्णः तं किञ्चित् वदति, तदा तस्य शुक्लदन्त-निर्गताः किरणाः शुभ्रवर्णं नारदं सुतरां शुक्लत्वं नीतवन्तः। अत्र कविः उपमां प्रयुज्य कथयति यथा सौधं चन्द्रकिरणैः सुतरां शुभ्रत्वं याति तथा श्रीकृष्णस्य चन्द्रकिरणवत् शुभ्राः दन्तांशवः शुभ्रवर्णं नारदस्य शरीरमापादितवन्तः। कविः लिखति-

**सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लम्भयन्।**

**द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः ॥**[19]

नारदस्य प्रशंसाव्याजेन श्रीकृष्णः तं कथयति यथा दृढपात्रे धनसम्पदः सुस्थिरं स्थापिताः भवन्ति तथा ब्रह्मा तस्य श्रुतिगणान् भवादृशे योग्ये सुते संन्यस्य सुस्थिरो भवति। यथा कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना। यथा-

**सदोपयोगेऽपि गुरुस्त्वमक्षयः निधिः श्रुतीनां धनसम्पदामिव ॥**[20]

अत्र नारदः दृढपात्रेण सह श्रुतिगणाः धनसम्पद्भिः सह उपमिताः। श्रीकृष्णस्य प्रशंसायां नारदः कथयति हे पुरुषोत्तम ! कंसादीन् दुष्टदानवान् भवान् हतवान्। एते दानवाः मृगसमानाः निकृष्टाः। जनाः एतेन दानववधेन तव स्तुतिं कुर्वन्ति। स्तुतिरियं हिरण्याक्षादिमहादैत्यविघातकस्य सिंहस्य ते तिरस्क्रियावत्। अत्र कंसाद्यसुराः क्षुद्रैर्मृगैः सह उपमिताः। यथा- **करोति कंसादिमहीभृतां बधाज्जनो मृगाणामिव यस्तवस्तवम्**[21]।

रावणस्य पराक्रमवर्णने कविः लिखिति - रावणः सहस्ररश्मिरिव तेजोमय आसीत्। तस्य दर्शनं सोढुमसमर्थः कौशिकः (इन्द्रः) कौशिकः (उल्लूकः) इव हिमालयगुहायामात्म-गोपनं चकार। अत्र सूर्येण सह रावणः उल्लूकेन सह इन्द्रः चोपमितः। कवेः भाषया—

**अशक्नुवन् सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम्।**

**प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद्दिवसानि कौशिकः ॥**[22]

कुवेरं विजित्य पुष्पकविमानापहरणप्रसङ्गे श्लेषोपमामुपयुज्य कविः काव्यसौन्दर्यं वर्धयति। अत्र रावणः एकः उन्मत्तगजेन सह उपमितः। उन्मत्तः गजः यथा मानसरोवरं विलोड्य पद्मादिपुष्पम् अपास्तं करोति, शङ्खं विभिन्नं करोति, मानसरोवरजलमपि कलुषीकरोति, तथा रावणः मनुष्यधर्मणः कुवेरस्य मानसम् (मनः) आविलीकृत्य तस्य महानिधिं शङ्खं पुष्पकयानञ्चापहृतवान्। तस्य गरिमाणमपि विध्वस्तं कृतवान्। वस्तुतः उन्मत्तगजेन सह रावणस्य यतुलनं कविना विहितं तत् सहृदयानां मनः प्रमोदयति। जन्मान्तरे रावणः शिशुपालत्वेन जनुरधत्त। यथा कश्चिन्नटः (शैलूषः) रङ्गमञ्चे स्वभूमिकां निर्वहति तथा एष रावणः जन्मान्तरे शिशुपालत्वेन जातः सन् मानुषदेहपरिग्रहादन्य इव भाति। यथा— **अथोपपत्तिं छलनापरोऽपरामवाव्य शैलूष इवैष भूमिकाम्।**

**तिरोहितात्मा शिशुपालसंज्ञया प्रतीयते सम्प्रति सोऽप्यसः परैः ॥**[23]

अत्र पद्ये शैलूषः उपमानः, शिशुपालः उपमेयः, इव इति उपमा प्रतिपादकः शब्दः। जातमात्रेण शिशुपालः मुखेन पूर्णचन्द्रनिभः आसीत्। अत्र शिशुपालस्य मुखमुपमेयम्, पूर्णचन्द्रः उपमानः। एतत्प्रतिपिपादयिषुः कविः लिखति— **स बाल आसीद् वपुषा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ॥**[24]

यथा सप्तजन्मानि यावत् सती पत्नी स्वपतिं पतिरूपेण लभते, तथा शिशुपालत्वेन जातः रावणः स्वस्य पूर्वजन्मगतां प्रकृतिं नैव त्यक्तुं पारयति तस्य पूर्वप्रकृतिः जन्मान्तरेष्वपि तम् आश्रयते। कविः वर्णयति -

**वलावलेपादधुनापि पूर्ववत् प्रबाध्यते तेन जगज्जिगीषुणा।**
**सतीव योषित् प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि ॥**[25]

शिशुपालस्य दौरात्म्यं नारदमुखात् श्रीकृष्णः निशम्य कीदृशीं दशामापन्नः इति प्रदर्शयितुं कविः प्रथमसर्गस्य अन्तिमे पद्ये लिखति — **ओमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाचं नभ-**
**स्तस्मिन्नुत्पतिते पुरः सुरमुनाविन्दोः श्रियं विभ्रति।**
**शत्रूणामनिशं विनाशपिशुनः वुद्धस्य चैद्यं प्रति**
**व्योम्नीव भ्रूकुटिच्छलेन वदने केतुश्चकारास्पदम्॥**[26]

शिशुपालस्य दौरात्म्यं निशम्य श्रीकृष्णः वुद्धः जातः। वुद्धस्य तस्य वदनं कविना आकाशेन सह उपमितम्। चन्द्रस्य शोभां धारयति तस्मिन् मुनौ नारदे आकाशमुत्पतिते सति श्रीकृष्णस्य मुखसदृशे आकाशे शत्रुविनाशसूचकः केतुः भ्रूकुटिव्याजेन स्थानं गृहीतवान्। यत्र केतुरस्ति तत्र विपदागच्छति। श्रीकृष्णस्य मुखाकाशे कोपसूचिका भ्रूकुटिः केतुरूपेण तिष्ठन्ती सती चैद्यं प्रति विपदं जनयामास। अत्र श्रीकृष्णस्य भ्रूकुटिः केतुना सह उपमिता। तस्य वदनमपि आकाशेन सह तुलितम्। एतेन चैद्यस्य विनाशः अवश्यम्भावीत्यर्थः सूचितः। एवमुपमालङ्कारमाध्यमेन कविः माघः शिशुपालवधस्य प्रथमसर्गस्य काव्यसौन्दर्यं पुष्णाति।

## द्वितीये सर्गे उपमावैभवम्-

इदानीं माघकाव्यस्य द्वितीयसर्गेऽपि उपमा कथं मनोहारिणी अस्तीति आलोच्यते। शिशुपालस्य दौरात्म्यविषये इन्द्रस्य सन्देशं यदा श्रीकृष्णः प्राप्तवान् तदा युधिष्ठिरसकाशादपि तत्कृते राजसूययज्ञे भागी भवितुं निमन्त्रणमाप्तवान्। कार्यद्वयाकुलः सन् श्रीकृष्णः कतरत्कार्यमादौ करणीयमिति विचारयितुं ज्येष्ठभ्रात्रा बलरामेण मन्त्रिणा उद्धवेन च सह मन्त्रणां कर्तुमियेष। एतदर्थं ते त्रयः सभावेदीं गताः। यथा-

**अध्यासामासुरुतुङ्गहेमपीठानि यान्यमी। तैरूहे केशरिक्रान्तत्रिकूटशिखरोपमा ॥**[27]

स्वर्णसिंहासनोपरि उपविष्टानां तेषां शोभा कीदृशी आसीदिति वर्णयितुं कविः कथयति यथा त्रिकूटाचलस्य शिखरत्रये त्रयः सिंहाः शोभन्ते तथा रत्नसिंहासनत्रये एते उपविष्टास्त्रयः अशोभन्त। त्रिभिः सिंहैः सह श्रीकृष्णाद्यास्त्रयः, त्रिकूटस्य त्रिभिः शिखरैः सह त्रीणि रत्नसिंहासनानि च तुलितानि सन्ति। उपमा शब्दः अत्र उपमाप्रतिपादकः। किञ्चिदुपक्रममारब्धुकामः श्रीकृष्णः सर्वादौ उक्तवान् यत् शिशुपालः अधुना बलवान् आक्रामकश्चास्ति। वर्द्धिष्यमाणः रोगः शिशुपालश्च तुल्यौ भवतः। क्रमवर्द्धमानः रोगः यथा आरम्भादेव नाशयितव्यः तथा शत्रुः शिशुपालोऽपि। क्रमवर्धमानेन रोगेण सह शिशुपालः उपमितः। पद्यं यथा—

**उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता। समौ हि शिष्टैराम्नातौ वत्स्यन्तावामयः स च ॥**[28]

श्रीकृष्णस्य उक्त्यनन्तरं बलरामस्य उक्त्यारम्भे कविः तस्यावस्थावर्णनप्रसङ्गे लिखति-

**घूर्णयन् मदिरास्वादमदपाटलितद्युती, रेवत्या वदनोच्छिष्टपरिपूतपूटे दृशौ ॥**[29]

अत्र मदिरापायिनः बलरामस्य लोचनद्वयं कविः वर्णयति। यद्यप्यत्र बलरामस्य नयनद्वयं रेवतीवदनोच्छिष्टसंसक्तत्वमपि परिपूतमिति कथनेन विरोधाभासः स्पष्टः तथापि नयनयोः पाटलितद्युतित्वकथने उपमाऽपि किञ्चित् स्पृशति, तेन काव्यस्य चमत्कारः जायते। श्रीकृष्णस्य उक्तिं समर्थयन् बलरामः कथयति, वासुदेवेन यन्नवीनं निर्दोषञ्च वाक्यमुक्तं तस्य भाष्यभूतं मम वचनमस्ति। यथा सूत्ररूपेण कथितं किञ्चित् वर्तते, तस्य व्याख्यानं भाष्यमित्युच्यते तथा सूत्रवत् विद्यमानस्य श्रीकृष्णस्य कथनस्य विस्तृतव्याख्यानवत् मदुक्तिरस्ति। कवेर्भाषया— **संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः । सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे ॥**[30]

अस्मिन् पद्ये श्रीकृष्णस्य उक्तिः सूत्रस्थानीया, बलरामस्योक्तिः भाष्यरूपा इति उपमा। तस्मिन् प्रसङ्गे बलरामः पुनः कथयति, यः जनः अविचारपूर्वकं किञ्चित् करोति अथवा कथयति तस्य तत्सर्वं तथा वृथास्ति यथा धानुष्कस्य लक्ष्यस्थलात् भ्रष्टसायकस्य चेष्टितं वृथा। अत्र लक्ष्यस्थलभेदने असफलेन धनुर्धारिणा सह अविचार्यभाषमाणस्य वाग्मिनः वचनं तुलितम्।

निष्फलत्वं साधारणधर्मः । अनन्तरं बुद्धमतावलम्बिभिः सह राजानः उपमिताः कविना । बौद्धानां रूप-वेदना-विज्ञान-संज्ञासंस्काराः इति पञ्च स्कन्धाः सन्ति । तत्र विषयप्रपञ्चः रूपस्कन्धः, तज्ज्ञानप्रपञ्चः वेदनास्कन्धः । आलयविज्ञानसन्तानो विज्ञानस्कन्धः, नामप्रपञ्चः संज्ञास्कन्धः । वासनाप्रपञ्चः संस्कारस्कन्धः । एवं पञ्चधा परिवर्तमानः ज्ञानसन्तानः एव आत्मा इति बौद्धाः वदन्ति । एतत्स्कन्धपञ्चकं विहाय यथा बौद्धानाम् अन्यः आत्मा नास्ति तथा राज्ञामपि—

**सहायाः साधनोपायाः विभागो देशकालयोः । विपत्तेश्च प्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते ॥** इति।

कामन्दकस्योक्त्यनुसारेण अङ्गपञ्चकं विहाय अन्यः मन्त्रः नास्ति । बौद्धानां स्कन्दपञ्चकेन सह राज्ञां मन्त्ररूपाङ्गपञ्चकं तुलयन् कविरत्र काव्यसौन्दर्यं वर्धयति । यथा-

**सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्दपञ्चकम् । सौगतानामिवात्मान्यो नास्ति मन्त्रोमहीभृताम् ॥**[31]

ततः परं राज्ञां मन्त्रम् अधीरयोधेन सह तुलयित्वा कविः लिखति —

**मन्त्रो योध इवाधीरः सर्वाङ्गैः संवृतैरपि । चिरं नो सहते स्थातुं परेभ्यो भेदशङ्कया ॥**[32] इति।

अधीरः भयालुः योद्धः सहायसाधनादिभिः पञ्चाङ्गैः संवृत्तोऽपि परेभ्यः भेदशङ्कया यथा चिरं शतुसमक्षं स्थातुं न समर्थः तथा मन्त्रणापि गोपनेन रक्षिता सती चिरं गुप्तरूपेण स्थातुं न शक्नोति । अत्र राज्ञां मन्त्रः उपमेयः, अधीरः योद्धः उपमानः । नरकासुरं नेतुं यदा श्रीकृष्णः प्रतिष्ठते स्म तदा मेरुपर्वततटं सूर्यास्तानन्तरं यथा अन्धकारः आवृणोति, तथा शिशुपालोऽपि निर्भयः सन् इमां पुरीं द्वारकां समावृणोत् इति सूचयित्वा कविः सूर्येण सह श्रीकृष्णम् अन्धकारेण सह शिशुपालम्, मेरुतट्या सह द्वारकाञ्च तुलयति । स्वपरिभवे पराक्रमः प्रदर्शनीयः इति सूचयितुमुपमामुखेन कवि कथयति—**अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः । पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥**[33]

स्त्रीणां तु लज्जा भूषणम् । सुरतसमये यथा तासां लज्जात्यागः भूषणं तथा मानिनां परिभवसमये पराक्रमप्रदर्शनमेव भूषणमिति उपमालङ्कारद्वारा सूचितं कविना । बलरामः पुनः कथयति, यथा सागरस्य वेलाभूमिः कुललङ्घनात् सागरं रुणद्धि तथा हे कृष्ण ! भवतः आज्ञा शतुकुललङ्घनोद्यतं यादवसैन्यसागरं रुणद्धि । यदि भवदाज्ञा स्यात्तर्हि यादवसैन्याः सहसा शतूपरि आक्रमणं कुर्युः । कवेर्भाषया—

**लिलिङ्घयिषतो लोकानलङ्घ्यानलघीयसः । यादवाम्भोनिधीन् रुन्धे वेलेव भवतः क्षमा ॥**[34]

श्रीकृष्णमुत्तेजयितुं बलरामः पुनः कथयति, हे कृष्ण ! शिशुपालोपरि तव विजयः अक्लेशेन भविष्यति । सांख्योक्तानुसारेण प्रकृतिः सर्वं सम्पादयति, साक्षिमात्रं पुरुषस्तु तत्फलमश्नुते । तथा तव सेना सर्वं साधयित्वा विजयफलमानेष्यति, त्वं तस्य फलस्य केवलं भोक्ता ।

**विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् । फलराजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि ॥**[35]

आपत्काले शतुः दमनीयः इति यदुक्तं तत् मानिनां कृते न शोभाकरं प्रत्युत लज्जायै एव । यथा पूर्णचन्द्रस्य ग्रासाय राहुः तथा पूर्णाङ्गरूपेण विद्यमानस्य शत्रोः आक्रमणमुचितम् कवेर्भाषया—

**नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये । विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः ॥**[36]

शिशुपालस्याक्रमणप्रसङ्गे बलरामः पुनः कथयति, व्रजे गा इव माहिष्मत्यामरीन् दाशार्हाः आवृण्वन्तु । अत्र उपमायाः चारुता मनोहारिणी वर्तते । अनन्तरम् उद्धवः बलरामोक्तिं खण्डयितुं कथयति, वर्णैः रचिताः स्वराः यथा असीमाः तथा वाङ्मयमपि असीमम् । अत्र तात्पर्यमिदं यत् कतिपयैः वर्णैः यथा रचिताः स्वराः असीमाः तथा वाङ्मयमपि । यः कोऽपि यत् किमपि वक्तुं पारयेत् । बलरामस्योक्तिमाक्षिप्य उद्धवः पुनः वदति, यथा कुशलाः चित्रकाराः पटोपरि लोभनीयं चित्रमङ्कयन्ति तथा केचन कुशलाः विचित्रां वाचं प्रसारयन्ति । अत्र कुशलचित्रकरैः सह बलरामः, तेषां चित्रैः सह बलरामस्य विचित्रोक्तिश्च उपमिता वर्तते । कवेः भाषया-

**म्रदीयसीमपि घनामनल्पगुणकल्पिताम् । प्रसारयन्ति कुशलाश्चित्रां वाचं पटीमिव ॥**[37]

रसभावज्ञः कविः यथा स्वकाव्ये केवलम् ओजोगुणमथवा प्रसादगुणं न व्यवहरति, प्रत्युत आवश्यकतानुसारेण यथार्थगुणस्य व्यवहारं करोति तथा कालज्ञः नृपः स्वशासने न केवलं स्वतेजः अथवा क्षमां प्रकाशयेत् । मर्मस्पर्शिणी उपमा अत्र विलोकनीया ।

**तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः । नैकमोजः प्रसादो वा रसभावविदः कवेः ॥**[38]

एवं पुनः उद्धवः कथयति यथा गदः (रोगः) कृतापचारोऽपि अनाविष्कृतविक्रियः काले प्राप्ते महतीं हानिं सम्पादयति, तथा शिशुपालोऽपि आगते काले सति अस्माकं महतीं हानिं कुर्यात्। अतः सः अधुना न कालुष्यं नेतव्यः।

शब्दार्थौ काव्यमिति मतमाश्रित्य सत्कविः यथा शब्दार्थयोः उभयोः यथार्थस्थितिमाश्रित्य काव्यं रचयति न केवलं शब्दस्य किम्बा अर्थस्य, तथा विद्वान् केवलं दैष्टिकतामथवा केवलं स्वपौरुषं नाश्रयेत्। यत्र यस्यावश्यकता तत्र तस्यालम्बनं कार्यम् कवेर्भाषया—

**नालम्बते दैष्टिकतां न निषीदति पौरुषे। शब्दार्थौ सत् कविरिव द्वयं विद्वानपेक्षते॥**[39]

अन्यच्च यथा कश्चित् स्थायिभावः रसत्वेन यदा परिणमति तदा तदर्थं स्वयमन्ये विभावानुभावव्यभिचारिणः आगच्छन्ति। एषां सहयोगेन स्थायिभावः रसत्वेन परिणमति, तथा यः विजिगीषुः राजा अस्ति तस्य विजययात्राकाले अन्येऽपि मित्रराजाः तस्य सहायकाः स्युः। कवेर्भाषया—

**स्थायिनोऽर्थे प्रवर्तन्ते भावाः सञ्चारिणो यथा। रसस्येकस्य भूयांसः तथा नेतुर्महीभृतः॥**[40]

एवमपि यः नरेन्द्रः स्वपरराष्ट्रविषये सम्यक् जानाति, निजराजमण्डले च सामादिभिः योगैः सह शासनं करोति, सः नरेन्द्रः नरेन्द्रः (सर्पग्राही) इव। उपर्युक्तः नरेन्द्रः (राजा) शतून् अनायासेन तथा वशीकरोति यथा नरेन्द्रः (सर्पग्राही) शास्त्रोषधिप्रयोगं जानन् मण्डलमध्ये (गोलाकारक्षेत्रमध्ये) तिष्ठन् दुष्टसर्पान् आयत्तीकरोति। अत्र विद्यमानोपमा कियती चमत्कारिणी तत् पश्यन्तु—

**तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता।**

**सुनिग्रहा नरेन्द्रेण फणिन्द्रा इव शत्रवः॥**[41]

सप्तस्वरेषु वंशीस्वरः प्रधानम्। प्रधानं वंशीस्वरं यथा अन्ये स्वराः पारिवारिकरूपेण अनुसरन्ति तथा विजिगीषुं नृपतिमन्ये नृपतयः अनुसरन्तीति उक्तवतः उद्धवस्य उक्तौ उपमा मनोहरा अस्ति। आकाशस्य शब्दः गुण इव अन्यैः नृपैः क्रियमाणं कार्यं किञ्चिदपि अकुर्वाणस्य नृपस्य गुणवद्भवति। न केवलमेतत् मालायां यथा मध्यमणिः (नायकः) अधिकद्युतिः सन् राजते तथा पार्ष्णिग्राहादिभिः संयुक्तः नायकः राजा नायकायते। कवेर्भाषया—

**यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः। एकार्थतन्तुप्रोतायां नायको नायकायते॥**[42]

उदात्तः स्वरः यथा अन्यस्वरान् अधःकरोति तथा शिशुपालोऽपि सर्वान् अधः कर्तुं शक्नोति। श्लेषोपमाद्वारा कविः अन्यत्र सूचयति यत्, यथा सम्पादितपरविनाशकार्यः सपक्षः बाणः कार्मुकेण निक्षिप्तः सन् उद्देश्यं साधयति तथा बाणो नामासुरः तस्य शिशुपालस्य सपक्षः सन् तदुद्देश्यं साधयिष्यति।

**सम्पादितफलस्तेन सपक्षः परभेदनः। कार्मुकेणेव गुणिना बाणः सन्धनमेष्यति॥**[43]

पुनः उपमामाश्रित्य उद्धवः कथयति, हे कृष्ण ! तत्सहायकाः बाणादयः त्वयि कुपिताः तिष्ठन्ति। शिशुपालकृतः भेदः तान् त्वयि प्रज्वलितान् करिष्यति। यथा अनिलः अग्नियुक्तानि काष्ठानि अधिकतया प्रज्वालयति। कवेर्भाषया— **उपयापः कृतस्तेन तानाकोपवतस्त्वयि। आशु दीपयिताऽल्पोऽपि साग्नीन् एधानिवानिलः॥**[44]

दिवसे यथा भानुः प्रबलः भवति सायंकालात्पूर्वं तस्य प्रतापः कदापि न्यूनः न भवति भवान् शिशुपाले शतापराधान् सोढुं प्रतिज्ञां कृतवान्। अतः अधुना युद्धं कृत्वा अपूर्णशतापराधस्य तस्य विनाशं कर्तुं न समर्थो भविष्यति।

एवमपि यथा शब्दविद्या (व्याकरणम्) सूत्रपदन्यासा सद्वृत्तिः (सद्व्याख्यायुक्ता) सन्निवन्धना (सद्भाष्यग्रन्थयुक्ता) सत्यपि पस्पशाह्निकरहिता न शोभते तथा राजनीतिः नीतिशास्त्रविरुद्धपदन्यासा भृत्यादीनां कृते सद्वृत्ति (जीविका) दायिनी सन्निबन्धना (कार्यशेषे प्रदत्तगोहिरण्यभूमिः) यदि अपस्पशा (पस्पशरहिता) गुप्तचरहिना भवति तर्हि तत् न शोभते, कवेर्भाषया—

**अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना। शब्दविद्येव नो भाति राजनीतिरपस्पशा॥**[45]

अत्र सुन्दरोपमाद्वारा व्याकरणशास्त्रेण सह राजनीतेः तुलना कथं चमत्कारिण्यस्ति तत् विदाङ्कुर्वन्तु सहृदयाः इति।

**उपसंहारः-** अनेन प्रकारेण शिशुपालवधमहाकाव्ये प्रथमद्वितीयसर्गद्वये विद्यमानायाः उपमायाः विचारः कृतः। समग्रे महाकाव्येऽस्मिन् विद्यमानानां सर्वेषामपि उपमासम्बलितानां पद्यानामुपरि विचारयामश्चेत् प्रबन्धोऽयं पुस्तकायमानो भविष्यति। अतः कालान्तरे एतद्विषयाधारेण कश्चनग्रन्थो निर्मीयते चेत् गवेषकानाम् उपकारसाधनं भविष्यति। कोऽपि गवेषकः सम्पूर्णमहकाव्ये विद्यमानमुपमावैभवमाधारीकृत्वा शोधकार्यं कर्तुं शक्यते इति शम्।

## सन्दर्भाः


1. सु. र. भ. 37.63
2. सं.सा.इ. पृ.
3. तत्रैव पृ.
4. चि.मी. उपमाप्रसङ्गे
5. का. प्र. 10/
6. शिशु. 1/4
7. शिशु. 1/5
8. शिशु. 1/6
9. शिशु. 1/7
10. शिशु. 1/8
11. शिशु. 1/11
12. शिशु. 1/12
13. शिशु. 1/15
14. शिशु. 1/16
15. शिशु. 1/20
16. शिशु. 1/21
17. शिशु. 1/22
18. शिशु. 1/24
19. शिशु. 1/25
20. शिशु. 1/28
21. शिशु. 1/39
22. शिशु. 1/53
23. शिशु. 1/69
24. शिशु. 1/70
25. शिशु. 1/72
26. शिशु. 1/75
27. शिशु. 2/5
28. शिशु. 2/10
29. शिशु. 2/16
30. शिशु. 2/24
31. शिशु. 2/28
32. शिशु. 2/29
33. शिशु. 2/44
34. शिशु. 2/58
35. शिशु. 2/59
36. शिशु. 2/61
37. शिशु. 2/74
38. शिशु. 2/83
39. शिशु. 2/86
40. शिशु. 2/87
41. शिशु. 2/88
42. शिशु. 2/92
43. शिशु. 2/97
44. शिशु. 2/99
45. शिशु. 2/112


----0----